ॐ

गारुडीयपुराणोक्तः प्रेतार्भकविमुक्तिदः ।
देवज्ञकाशीनाथेन संस्कृतोयं च शोधितः ॥

अथ कपालमोचनश्राद्धविधिः

द्विग्रामश्राद्धसंज्ञस्तिभट्टकेशवलोचितः ।
पुष्पाञ्जलिविधानेन भूयात्सज्जनपूजने ॥

पुलादजात्युपहितेन
ज्योतिषी काशीनाथशर्मणा
अयं प्रकाशं नीतः ५०१५ संवत्सरे
मूल्यं –) एकआना

K. STANDARD PRESS

अथ कपालमोचनश्राद्धविधिः ॥

गरुड उवाच ॥ कृतार्थोऽस्मि कृतार्थोऽस्मि श्रुत्वाजन्मविधिं हरे । इ-दानीं श्रोतुमिच्छामि प्रेतस्य मोक्षनिर्णयम् ॥ श्रीभगवानुवाच ॥ पूर्वजन्मकृतैः पापैर्गर्भे नश्यन्ति जन्तवः । निःसृत्यै योनितो वापि म्रियन्ते संस्कृतिं विना ॥ तेषां क्रियाभ्यः संस्कारान कर्तव्या खगेश्वर । नाम्नासंकल्प्य तेभ्यो हि प्रदेयं पायसादिच ॥ अमावस्यायां कन्यार्के श्राद्धात्पितृविमुक्तिदे । श्रावणशुक्ल द्वादश्यां विशेषात्प्रेतमुक्तिदे ॥ कपालमोचने नागे द्विग्रामे प्रेतकास्तु ते । मुक्तिं लभ्यन्ते विधिना प्रेततर्पणकारिणा ॥ आनीय बालकं तत्र तर्पयेत्पायसेनतु । भूषयेदपि वस्त्राद्यैस्तोषयेद्दक्षिणादिभिः ॥ पादौ प्रक्षालयेदादौ गृहीत्वा प्रेतनाम च । भोक्तुंतदन्नमर्हस्तु बालको हीनसंस्कृतिः ॥ आब्दिकं च ततः श्राद्धं समाप्यच तिलोदकम् । नाम्नोननालिकोद्धारादेव प्रेतविमोचनम् ।

दशाङ्गुष्ठप्रवाहान्ताः सदा तृप्तिप्रदायिनः ॥ तत्र सर्वं पितॄंस्तश्च देयाः पिण्डाह्य-नुक्रमात् । पश्चात्प्रेतविमुक्त्यर्थमेकः पिण्डः प्रदीयते । यथा महेशितुर्ब्रह्म-हत्यातत्रक्षताऽभवत् । तथा प्रेत्यविमुक्तिः स्यात्प्रेतानामित्थमर्चनात् ॥ वर्षा न्ते चाथवा तत्र वर्षे ह्रिग्राम उत्तमे । प्रेतान्सन्तर्पयेदेव तेषामन्या गतिर्नहि ॥ तेषांसाफल्यहेत्त्वर्थं मया दानमिदंकृतम् । इति मन्त्रेण प्रेता र्थं दत्त्वा विप्रान्क्षमापयेत् ॥ इति गारुडीयप्रेतविमोचनपटले उक्तत्वात् ॥

ब्रह्मकलशे (प्रदानं) । योरुद्रो अग्नौ ॥ भवायदेवाय । त्रिष्णुपञ्चाय तनदेवताभ्योनमः, यतइन्द्र० । अनाभौ, योरुद्र अग्नौ ह०, तीर्थस्नेयं, धूपदी-पौ, (अपसव्येन) दक्षिणाग्रान्दर्भानास्तीर्य, (भूपृष्टे) अस्मत्कुले मृतायेच गतिर्ये षां न विद्यते । आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकात् । बन्धुवर्गकुले ये-च गतिर्येषां न विद्यते, आवाहयिष्ये तान्सर्वान्दर्भपृष्टे तिलोदकात् । (इति ति लोदकैरवनेजनमऽथसप्तदश पिण्डान्स्थापयेत्) । अस्मत्कुले मृतायेचगतिर्येषां

न विद्यते । तेषामुद्धरणार्थाय इमं पिण्डं दधाम्यहं १ । मातामहकुलोत्पन्ना गतिर्येषां न विद्यते । तेषामुद्धारणार्था० २ । बन्धुवर्गकुले येच गति० ३ । अजातदन्तायेकेचिद्येच गर्भप्रपीडिताः । तेषामु० ४ । अग्निदग्धाश्च येकेचिन्नाग्निदग्धास्तथापरे । विद्युच्चौरहता येच तेभ्यः पिण्डं दधाम्यहम् । ५ दावदाहे मृतायेच सिंहव्याघ्रहताश्चये । दंष्ट्रिभिः शृङ्गिभिर्वापि तेभ्यः पि० ६ । उद्बन्धनमृता येच विषशस्त्रहताश्च ये । आत्मोपघातिनो येच तेभ्यः पि० ७ । अरण्ये वर्त्मनि येच क्षुधया तृष्णया हताः, भूतप्रेतपिशाचेभ्यस्तेभ्यः पि० ८ । रौरवे चान्धतामिस्रे कालसूत्रे च येस्थिताः । तेषामुद्धरणार्थायतेभ्यः पि० ९ । अनेकयातनासंस्था नीयंते यमकिङ्करैः । तेषामु० १० ॥ नरकेषु समस्तेषु यातनासु च ये स्थिताः । तेषामु० ११ । पशुयोनिगता येच पक्षिकीटसरीसृपाः । अथवा वृक्षयोनिस्थास्तेभ्यः पि० १२ । जात्यन्तरसहस्रेषु भ्रमन्तः स्वेन कर्मणा । मानुष्यं दुर्लभमेषां तेभ्यः० १३ । दिव्यन्तरिक्षभूमिस्थाः पित

रो बान्धवादयः। मृताश्चसंस्कृता येचतेभ्यः १४। येकेचित्प्रेतरूपेण वर्तते पितरो मम। ते सर्वे तृप्तिमायान्तु पिण्डदानेन सर्वदा १५॥ येबान्धवा अबान्धवा येन्यजन्मनि बान्धवाः। तेषां पिण्डो मया दत्तो ह्यक्षयमुपतिष्ठताम् १६॥ ये लुप्तपिण्डाः पितरोस्मदीया गर्भे प्रनष्टा जलभूमिमग्नाः। ते तृप्तिभाजः पर रूपयुक्ताः पापैर्विमुक्तास्त्रिदिवं प्रयान्तु॥ ये मत्कुले लुप्तपिण्डाः पुत्रदारवि वर्जिताः। क्रियालोपगता येच जात्यन्धाः पङ्गवस्तथा। विरूपा आमगर्भाश्च ज्ञाताऽज्ञाताः कुले मम। तेषां पिण्डप्रदानेन तृप्तिर्भूयात्सदैवहि १७॥ लुप्तपिण्डेभ्य आमगर्भेभ्यः वासांसिनमः गन्धार्घपुष्पदीपधूपभक्ष्यभोज्यतिलमधुमिश्रोदक हिमपानादि-दक्षिणान्तं कृत्वा(ततो घृतमधुक्षीरदधिकृष्णतिलोदकैः काष्टपात्रान्तरावर्तिजलधारैस्तु तर्पयेत्)॥ ये बान्धवा अबान्धवा येऽन्यजन्मनि बान्धवाः। अस्मद्दत्तंपिण्डमऽत्त्वा शुद्धं वारि पिबन्तुते १। पितृवंश्या मृता येच मातृवंश्याश्च ये मृताः। गुरुशुश्वरबन्धूनामक्षय्यमुपतिष्ठताम् २ येपि द

ग्धा अदग्धा वा येचान्ये बन्धुसंमिताः। अस्मद्दत्तंपिण्डमत्त्वा शुद्धंवारि पिव
न्तुते ३। येमत्कुले लुप्तपिण्डाः पुत्रदाराविवर्जिताः। क्रियालोपगतायेच जा-
त्यन्धाः पङ्गवो जडाः ४। विरूपा आमगर्भाश्च ज्ञाताऽज्ञाताश्चदुर्भगाः।
अस्मद्दत्तं पिण्डमत्त्वा शुद्धं वारि पिवन्तु ते ५। अस्मिन्भवाध्वनि घोरे भू
त्वा पापैश्च नारकाः। तेषां पिण्डं वारियुक्तमऽक्षय्यमुपतिष्टताम् ६। उत्सन्नकुल
धर्माणांयेषां जन्म कुले मम। तेषां वारि पिण्डयुक्तमऽक्षय्यमुपतिष्ठताम् ७।
द्विषद्भिभिन्नाः समरेऽतिसङ्गाद्विना विवाहं विप्रजा विनष्टाः। विषाग्निविद्युन्नखि
दंष्ट्रिभिन्ना मद्दत्तपिण्डोदकमस्त्वऽक्षय्यम् ८। आब्रह्मणोये पितृवंशजाता मातु
स्तथा वंशभवा मदीयाः। वंशद्वयेस्मिन्ममदासभूया भृत्यास्तथैवाश्रितसेवकाश्च
९। मित्राणिसख्याः पशवश्च वृक्षा दृष्टा ह्यदृष्टाश्च कृतोपकाराः। जन्मान्तरे
ये मम संगताश्च तृप्त्यै स्वधापिण्डमहं दधामि १०। येमत्कुले लुप्तपिण्डा नर
के पतिता नराः। तेषामुद्धरणार्थाय वारिपिण्डं दधाम्यहम् ११।भ्रूणहा

आमगर्भाश्च मृतगर्भाश्च ये नराः। स्रावाः पाताश्च नाम्नोना दिनजा मासजा अपि १२ ॥ यक्षजाप्रेतभूताद्या राक्षसयोनिमागताः। तृप्ता भवन्तु सुचिरा न्मुच्यन्तु पापयोनितः १३ ॥ काष्ठप्रणालिकाम्भोभिस्तृप्तायान्त्वक्षयंपदम्। आब्रह्मस्तम्बपर्यन्तंदेवर्षिपितृमानवाः १४। तृप्यन्तुपितरः सर्वे मातृपितृकुलोद्भवाः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् १५। आब्रह्मभुवनान्तानामिदमस्तु तिलोदकम्। अक्षय्यतृप्तिदं नित्यं मम चारोग्यदायकम्। ॐनमो देवेभ्यः० ॥

(एवं तर्पयित्वा पुष्पं पिण्डेषु) आयुः प्रजां धनं विद्यां स्वर्गमोक्षसुखानिच। प्रयच्छन्तु तथा राज्यं नृणां प्रीता पितामहाः १। एष पिण्डो मया दत्तस्तव हस्ते जनार्दन। गयायां पितृरूपेण स्वयमेवोपगृह्यताम् २। आत्मनश्चार्थलाभाय क्षेमाय विजयाय च। शत्रूणां बुद्धिनाशाय पितृनुद्धरनायच ३। पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः। यत्र तत्र स्मरेन्नित्यं पितृणां दत्तमक्षय्यम् ४।

कलशपृच्छां विसर्ज्य ॥ सूर्ये पुष्पं (नमो धर्मनिधानाय । (तीर्थे पुष्पं) शान्तिः पुष्टिः तथा तुष्टिः सन्तु मे त्वत्प्रसादतः । सर्वपापप्रशान्तिश्च तीर्थराज नमो स्तु ते ॥ (इति कपालमोचनश्राद्धविधिः) । (रौप्यप्रतिमां प्रतिपादयेत्) सा वित्राणि, अद्यतावत्, आत्मनो, ज्ञाताज्ञातकृतपापनिवारणार्थं अतिक्रान्तदोपशांत्यर्थं कायिकवाचिकमानसिकपापशांत्यर्थमिमां प्रतिमांकृमिकीटपतङ्गाकृतिसहितां सान्नां सदक्षिणां सवस्त्रां ददानि ३ । कइदमितिप्रतिगृह्णाति । समस्तमातापितृश्राद्धे तु ध्वनि रुचिकौ विश्वेदेवस्थाने पूज्यौ इति विशेषः ॥

नोट

आमगर्भश्राद्ध के पीछे यज्ञोपवीतरहित बालक को पायस आदिक से पूजा करके, समस्तमाताश्राद्ध करना चाहिए ॥